हयग्रीवदण्डकम्

जयजय तुरङ्गस्य नस्तो मुखान्निर्गतानन्तवेदादिविद्याप्रबोधीकृताम्भोजसम्भूत
हेषारवोन्निर्जिताशेषदैतेय लक्ष्म्याऽमृतेनानिशं सिच्यमानाङ्ग
राकेन्दुकोटिप्रतीकाशदेहप्रभाभासिताब्जातगर्भाण्डबाह्यान्तरानम्रधात्रीररुद्रेन्द्र-
मुख्यामरव्रातकोटीरमाणिक्यकान्तिच्छटाराजितांघ्रे शरच्चन्द्र हृन्मन्दिर-
ध्वान्तराशेः प्रपन्नामरानोकस्त्वं पुरा देव नारायणाख्येन रूपेण लोकं स्वगर्भे
निधाय श्रियो बाहुयुग्मान्तरे संस्थितस्सन् सिसृक्षुस्त्वमादौ विधातारमासृज्य
तत्सत्रयागे हयग्रीवरूपं समास्थाय दैत्याधमं लोकशत्रुं मधुं कैटभाख्यं
च चक्रेण हत्वा पुनर्लोकसंरक्षणार्थं झषाद्यावतारैः महादैत्य-
सङ्घांश्च निर्मथ्य लोकान् सदा पासि भो देव यस्त्वां मनुष्योत्तमो
दुग्धपाथोधिमध्यस्थ सुश्वेतनामोल्लसद्द्वीपमध्ये सुसन्तानवृक्षावलीवेष्टिते
सन्मणिस्तम्भयुक्ते महामण्टपे तत्र पङ्केरुहे कर्णिकायां सुधासूतिबिम्बे
महायोगपीठे निषण्णं नमद्देवतामौलिमन्दारमालास्रवन्माकरन्दद्रवक्षालिते-
नांकुशच्छत्रपाठीनवज्राम्बुजातोर्ध्वरेखाङ्कितेनांघ्रियुग्मेन संराजितं
श्वेतकूर्माभगुल्फं लसज्जानुयुग्मं दिशादन्तिशुण्डोपमोरुद्वयं
दुग्धसिन्ध्वन्तरीयोपमेनाच्छकौशेयवस्त्राभिरामेण भास्वन्नितम्बेन युक्तं
वियद्वाहिनीवर्तुलावर्तगम्भीरनाभीसरस्तीरसञ्जातरोमावलीमण्डितेनोदरेणाञ्चितं
श्रीनिवासायतोरुस्थलं शेषभोगाभहस्तैश्चतुर्भिस्सदा शङ्खमुक्ताक्षमाला-
लसत्पुस्तकोद्बोधयुक्तारविन्दानि समयग् दधानं रणद्भृङ्गसंसक्तसम्फुल्ल-
मन्दारमालावलीलग्नसत्कण्ठशोभाभिरामं शशाङ्कांशुसङ्काशसत्केसरव्रात-
केशावलीमण्डितं दन्तकान्तिच्छटाभासिताशावकाशं दलत्पद्मपत्रायताक्षं
स्फुरद्दक्षिणावर्तशङ्खप्रतीकाशकर्णं लसन्मस्तकं दिव्यमुक्तामयोदारकोटीर-
केयूरहारावलीमेखलाद्यखिलैर्भूषणैर्भूषितं चन्दनार्चर्चिताशेषगात्रं सदा
मूर्तिमद्वेदशास्त्रेतिहासादिविद्यावलीसेवितं श्रीसतीचञ्चलापाङ्गनीराजितं
ब्रह्मरुद्रेन्द्रादिवन्द्यं सन्मनःपङ्कजे चिन्तयन् देव बाह्ये हरिद्गोमयालिप्तके
रङ्गवल्लीसुशोभाञ्चिते स्थण्डले श्वेतकौशेयवस्त्रावृते मालतीमल्लिकादि-

प्रसूनावलीमण्डिते चक्रपद्मादिसन्मण्डलोपेतपीठे यथा याज्ञिका बाह्यवह्नौ
निजान्तस्स्थमग्निं समाकृष्य मन्त्राक्षतैः स्थापयित्वाऽऽवर्जयन्ति स्म
तद्वद्बहिर्योगमार्गेण हृत्पद्ममध्यस्थमीशं स्वबिम्बे प्रतिष्ठाप्य नित्यं
त्वदष्टाक्षरेणोक्तमार्गेण सम्पूजयन् वर्तते देव यद्वा सुवर्णादिसल्लोहपत्रेषु वा
भूर्जपत्रेषु वा पट्टवस्त्रेषु वा वह्निपूर्बाणदिग्राजदन्तारकेषु क्रमादेकवर्णं
त्वदीयं लिखित्वाऽथ पञ्चाक्षरं गारुडं चाष्टवर्णं स्वरानुष्टुभं सम्यगालिख्य
तद्वद्बहिर्योगमार्गेऽशरीरा क्षरैः कादिक्षान्तैः क्रमाद्वेष्टयित्वा ततो
व्योमयुग्मं धरामण्डले दिक्पतीनां च बीजानि संलिख्य त्वद्बिम्बवद्गन्धपुष्पो-
पहारादिभिर्भक्तिभावेन सम्पूज्य सन्मन्त्रसिद्धो भवेत्तस्य वक्त्रे स्थिरा शारदा
तस्य भक्तिर्भवेच्छाश्वती तस्य विद्याः स्फुरन्त्यश्रुतप्रज्ञया तस्य
पुत्रादिवृद्धिर्भवेत्तस्य वाञ्छा लभन्तेऽखिला देव यद्वा मनोर्जञ्झपूको
भ्रुवोरन्तरे त्वां समस्तागमानुद्गिरन्तं समाचिन्त्य तत्रैव दीर्घान्वितं बिन्दुयुक्तं
चतुर्थोष्मरूपं मनुं स्वान्वितं सम्यगुच्चार्य सायं मुखे मुक्तनामासने
सन्निवेश्यानिलं बेळया पूरयन् केवले कुम्भके संस्थितस्सन् तदूर्ध्वीकृते
स्वस्य जिह्वाग्रभागेन रन्ध्रं निरुध्योद्गतं सोमनीतं पिबेत्प्रत्यहं तस्य गीर्वाणवाणी
वशा तस्य पातञ्जलं स्याज्जलं तस्य भाट्टं गरट्टोद्धुपिष्टोपमं तस्य तर्कस्तु
पाणिस्थकर्कन्धुका तस्य वैय्यासिकी गीर्मरुन्मेचकी सैष वादेषु पञ्चाननो देव यो वा
घृतं ब्राह्मिकापाचितं तथा कंगुणीबीजजालानि वाचाऽभिमन्त्र्य त्वदीयेन मन्त्रेण
नित्यं पिबेत्खादयेत्तस्य वक्त्रे कवित्वं सुधासम्मितं सम्भवेत्तस्य बुद्धिर्बहु-
ग्रन्थसन्धारिणी स्यात्प्रभो देव यत्ते पदाम्भोजशौचोदकं शूलपाणेः शिरोभूषणं
यस्य नाभ्युद्भवो लोकनिर्माणकृत् पद्मभूः यस्य पौत्रो हरः सर्वसंहारकृत्
यस्य निश्श्वासरूपाः समस्तागमाः यस्य पत्नीकटाक्षस्य लेशो विधीशेन्द्रमुख्यामरस्थानदो
यस्य तल्पं सशैलाटवीसिन्धुविश्वम्भराधारकः शेषभोगीश्वरो यस्य वाहोत्तमः
सर्ववेदाभिमानी खगाधीश्वरो यस्य वक्त्राग्निमध्ये सुरारातिसङ्घाः पतङ्गा बभूवुः
स्वयं यस्य दिव्याद्भुयो भक्तिभाजां नृणां तीर्थकोट्युत्थपुण्याधिको यस्य विज्ञान-
भक्त्याख्यसद्द्रव्यसम्पादकानां भवेदक्षयानन्दभोगः प्रभो देव तं त्वामहं
सच्चिदानन्दमूर्तिं जगज्जन्मसंरक्षणाज्ञानसंहारबन्धादिहेतुं निरस्ताधिकं निस्समं
सद्गुणाम्भोनिधिं नित्यमुक्तं निजानन्दतृप्तं विभुं निर्गताशेषदोषं निरीशं
स्वरोमावलीकूपसंस्थानगर्भाण्डकोटिव्रजं मुक्तवागीशपक्षीशदेवेशकन्दर्पसूर्यादि-
मुख्यामरैः सेवितं श्रीकराम्भोजरत्नोर्मिकादीधितिस्तोमशोणीकृतांघ्रिद्वयं
भक्तलोकार्जितानेकजन्माद्यशुष्काटवीपावकं सर्वदैवैकवन्द्यं लसद्भक्तिगम्यं
महायोगिहृन्मन्दिरं सन्ततानन्तभोगासनं देवदेवं प्रणम्य प्रभो याचये ।

साधुनिन्दात्मशंसाश्रुतग्रन्थदुश्शास्त्रवेत्तृत्वदुष्टात्मसेवाद्यनन्तापराधालयं
नित्यकर्माद्यनुष्ठानदूरं दुराचारिणं ज्ञानहीनं सदा क्रोधलोभाद्यमित्रान्वितं
स्वोत्तमाचार्यसेवावभिज्ञं कृतघ्नं नृशंसं महाघौघसिन्धौ निमग्नं
कृपाम्भोनिधे पाहि निश्चञ्चलां ते पदाम्भोजभक्तिं प्रभो देहि सुज्ञानवन्तं

कुरुष्वाशु मां यत्ते मनोज्ञं लसत्पुण्डरीकायताक्षं प्रसन्नाननं चारुमन्दस्मितं
शोभमानं शशाङ्कप्रभं दिव्यसद्गन्धभूषाम्बरालंकृतं श्रीसखं
सच्चिदानन्दमूर्तिं सदा मन्मनःपङ्कजान्ते स्थिरं स्थापयानन्तशक्ते जय वाजिवक्त्र
प्रभो जय सिन्धुकन्यापते जय देवचूडामणे जयानन्तशक्ते जयानन्दसिन्धो

जयागाधबोध प्रभो श्रीरमानाथ लोकैकनाथा रमेयाच्युतानन्त गोविन्द तुभ्यं
नमस्ते नमस्ते नमस्ते नमः पाहि मां पाहि ।

इति श्रीमद्वादिराजपूज्यचरणविरचितं

श्रीहयग्रीवदण्डकं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु